# Aravindadarshanam ChaityapurushaH

# અરવિન્દદર્શનમ્ ચૈત્યપુરુષઃ

## Document Information

Text title : Aravindadarshanam ChaityapurushaH

File name : aravindadarshanam.itx

Category : misc, sahitya, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : May 13, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 14, 2021

*sanskritdocuments.org*

# અરવિન્દદર્શનમ્ ચૈત્યપુરુષઃ

લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

અસ્માકં ભારતવર્ષે યે યે મહાત્માનો ધરાતલં પવિત્રીકૃતવન્તસ્તેષુ મહાત્મન અરવિન્દસ્ય નામ સર્વોત્કર્ષેણ શ્રૂયતે । તત્ર દ્વિસપ્તત્યધિકેઽષ્ટાદશશતકે અગષ્ટમાસસ્ય પઞ્ચદશદિનાંકેઽયં (૧૮/૦૮/૧૮૭૨) મહાત્મા કલિકતા મહાનગર્યામેકસ્મિન્ કુલિને વંગીય-બ્રાહ્મણ-પરિવારે જનિમલભત । અસ્ય પિતુર્નામ કૃષ્ણધન ઘોષો માતુશ્ચ નામ સ્વર્ણલતા આસીત્ । મૃણાલિની દેવી અસ્ય ધર્મપત્ની આસીત્ । ઉચ્ચશિક્ષિતોઽયં મહાત્મા એકાધારેણ પ્રખ્યાત-સ્વાધીનતા સંગ્રામી, દાર્શનિકઃ, કવિઃ, આધ્યાત્મિકગુરુઃ, યોગી ચ આસીત્ ।

ભારતીયદર્શનક્ષેત્રે તત્પ્રોક્તં અરવિન્દદર્શનં સ્વકીયં મહત્વપૂર્ણં સ્થાનં ભજતે । દર્શનશાસ્ત્રાણાં પુંખાનુપુંખચિન્તનં સમીક્ષણં વિશેષતો વેદાન્તદર્શનસ્ય યોગદર્શનસ્ય ચ સૂક્ષ્મવિવેચનં વરીવર્તિ અરવિન્દદર્શને । તેન કતિપયાનિ સ્વતન્ત્ર મતાનિ ચ પ્રદર્શિતાનિ । તેષુ ચૈત્યપુરુષતત્ત્વમન્યતમમ્ । સંપ્રતિ દિઙ્માત્રં વિવક્ષ્યતેઽત્ર । અરવિન્દનયે અન્તરાત્મા ચૈત્યપુરુષસંજ્ઞકો જીવસ્ય પ્રતિનિધિસ્વરૂપઃ, આત્મનો ભિન્નઃ । સમષ્ટિરૂપ આત્મા વિશ્વાતીતો વિશ્વમય અપરિણામી ધ્રુવશ્ચ । મનુષ્યશરીરાધિષ્ઠાતા ચૈત્યપુરુષઃ વ્યષ્ટિરૂપો દેહ-પ્રાણ-મનસાં ભર્તા, નેતા અવિનશ્વરઃ । અયં હૃદયપ્રદેશે ભાવાવેગસ્ય કેન્દ્રપ્રદેશે સ્થિત્વા દેહયન્ત્રં નિયન્ત્રયતિ । ભગવન્તં પ્રાપ્તું પ્રચ્છન્નેન પ્રકાશ્યેન જીવં પ્રચોદયતિ ।

આત્માનં શિશુઃ ભગવતઃ સન્તાનરૂપો ભક્તરૂપો વા સ્વીકરણં ચૈત્યપુરુષસ્ય મુખ્યસ્વભાવઃ । યદ્યપિ ચૈત્યપુરુષસ્ય ભગવતા સહ ભેદો નાસ્તિ તથાપિ અભિવ્યક્તૌ કોઽપિ ભેદઃ સ્વીક્રિયતે । જીવાત્મા વિશ્વમય-વિશ્વાતીતભગવતિ એકત્રિતો ભવિતુમર્હતિ કિન્તુ ચૈત્યપુરુષઃ વ્યષ્ટિભૂત્વાપિ જીવસ્ય પ્રતિનિધિરૂપેણ કાર્યં કર્તું શક્નોતિ ।

પુરુષાપરપર્યાયો જીવાત્મા કારણકોષાન્તર્ગતો વિશ્વાતીતો બ્રાહ્મીશક્તિયુક્તઃ । કારણકોષસ્ય દ્વૌ પુરુષરૂપૌ પ્રસિદ્ધૌ । ઊર્ધ્વરૂપો જીવાત્મા અસ્મદાદિસંજ્ઞાયુક્તઃ । અધોરૂપ અન્તરાત્મા ચૈત્યપુરુષઃ પરિણામી, જીવસ્ય સચેતનકર્તા । જીવાત્મા પરંબ્રહ્મણ અંશવિશેષઃ અપરિણામી । અસ્માકં પ્રકૃતસત્તા જન્મમૃત્યુરહિતો નિત્યઃ શુદ્ધબુદ્ધમુક્તસ્વરૂપઃ । સ્વભાવત અસ્ય વિવર્તનં નાસ્તિ, સચ્ચિદાનન્દસ્ય એકત્વેઽસ્ય સમાવેશો ભવતિ । શરીરે જીવસ્ય પ્રતિનિધિઃ અન્નમયપુરુષઃ । પ્રાણેષુ ચ પ્રાણમયપુરુષઃ મનસિ ચ મનોમયપુરુષનામ્નાઽભિહિતો વર્તતે । હૃદયાન્તર્વર્તિ-પરિણામશીલસત્તારૂપેણ ચૈત્યપુરુષો વર્તતે, યઃ ખલુ અમૃતસ્ય પ્રતિનિધિરુપ ઉક્તઃ ।

મનુષ્યશરીરે ચૈત્યપુરુષસ્ય ક્રમપરિણામઃ સમ્ભવતિ । મૂલતઃ સ અપૂર્ણઃ । જીવસ્ય સારૂપ-સાયુજ્યેન ચ તસ્ય પરિપૂર્ણતા જાયતે । બીજરૂપસ્ય ચૈત્યપુરુષસ્ય પ્રકૃત્યાઃ કામનાયાઃ સકાશાત્ અંકુરોદ્ગમો ભવતિ ।

જન્મજન્માન્તરિણકર્મણા હિ તસ્મિન્ શાખા-પ્રશાખાઃ જાયન્તે । પલ્લવ-પુષ્પ-ફલાનિ શોભન્તે । યથા વૃક્ષસ્ય વૃદ્ધ્યર્થં જલ-વાયુ-આલોકાદીનાં પ્રયોજનં ભવતિ તથૈવ ચૈત્યબીજસ્ય । સઃ પાર્થિવજન્મન અભિજ્ઞતાં સ્મરતિ । યદા ચૈત્યપુરુષે કર્તૃત્વ-નિયન્તૃત્વાદિ સંકલ્પા જાયન્તે, દેહ-મનઃ-પ્રાણાઃ તસ્મિન્ સહયુક્તાઃ ભવન્તિ, તદા પ્રાકૃતજીવનસ્ય અયમારમ્ભો ભવતિ ।

ચૈત્યપુરુષજ્ઞાતા ન જીવાત્મપરમાત્મનો વાસ્તવતાં જ્ઞાતું શક્નોતિ । વિવર્તનદૃશા ચૈત્યપુરુષો યદ્યપિ મૂલસત્તા તથાપિ સ ભગવતઃ સનાતનાંશઃ । જીવાત્મા વિવર્તનવાદેન ન પરિણમતે । ચૈત્યપુરુષસ્ય ચેતના યદા પૂર્ણતામાપ્નોતિ તસ્મિન્નેવ સમયે ચૈત્યપુરુષ-જીવયોઃ સંયોગઃ કથયિતું શક્યતે નાન્યથા ।

અસ્માકં દેહો યદા પઞ્ચભૂતે વિલીનો ભવતિ તદા કુત્ર ચૈત્યપુરુષશ્ચેદુચ્યતે । પ્રાણતત્ત્વં પ્રાણભૂમૌ કિયત્કાલં તિષ્ઠતિ, અન્તે પ્રાણમયકોષે વિલીનો ભવતિ । મનસ્તત્ત્વં મનોમયભૂમિમતિક્રમ્ય મનોમયકોષે એવં ચાન્તે ચૈત્યપુરુષઃ ચૈત્યલોકં પ્રવિશ્ય તત્ર વિશ્રામ્યતિ । પરવર્તિકાલે ચૈત્યધામ પરિત્યજ્ય મનોભૂમિં પ્રત્યાવર્ત્ય મનોપાદાનં સંગૃહ્ય પ્રાણમયં ગત્વા પ્રાણોપાદાનં ગૃહીત્વા અન્નમયભૂમિં પુનરાગચ્છતિ । અન્નમયદેહધારણકર્તું જનકં-જનનીં ચ સ્વીકરોતિ । ઇત્થં ચૈત્યપુરુષસ્ય જન્મ-મરણચક્રં જાયતે । યદા જડાધારદેહઃ પૂર્ણતયા ચિન્મયભૂતો ભાગવતીતનું વિધાસ્યતિ તદા ન તત્ર પુનરાગમનં ચિન્ત્યતે ।

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

---

*Aravindadarshanam ChaityapurushaH*

pdf was typeset on May 14, 2021

Please send corrections to *sanskrit@cheerful.com*